"पञ्चाशल्लिपिभिः पुरा भगवति ! त्वया यदङ्गीकृतं तत्राहं सफलोऽधुनापि विमतिस्तत्पादपद्मस्मृतेः ॥")

पञ्चास्यः, पुं, (पञ्चं विस्तृतं आस्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १० ॥ (पञ्चानि आस्यानि यस्य । शिवः ॥ पञ्चमुखविशिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७४ । २३ ।

"लक्षितेयं विशालाक्षी मया शोकपरायणा ।
आदायैतां न जानीषे पञ्चास्यामिव भोगिनीम् ॥")

पञ्चीकरणं, क्ली, पञ्चभूतानां भागविशेषेण मिश्रीकरणम् । यथा । "पञ्चीकरणन्तु आकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ इति ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशिष्ट्यात्तु तद्वादस्तद्वाद इति न्यायेन आकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्दस्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्व्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति ॥" इति वेदान्तसारः । ३८-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्म्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उपविषपञ्चकम् । यथा, राजनिर्घण्टे ।

"स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च पाण्डित्यशालिनः ॥"

पञ्चोष्माणः, पुं, (पञ्च उष्माणः ।) आहारपाचकशरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम् ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥"

पञ्जरं, क्ली, (पञ्ज्यते रुध्यते उदरयन्त्रमनेन । पजि रोधे + अरन् ।) कायास्थिवृन्दम् । शरीरास्थिपञ्जरम् । (यथा, पञ्चदशी । ६ । १७३ ।

"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"

पञ्ज्यते रुध्यते पक्ष्यादिरत्र ।) पक्ष्यादिबन्धगृहम् । इत्यमरभरतौ । पिँज्रा इति भाषा । तत्पर्य्यायः । शालारम् २ । इति जटाधरः ॥ (यथा, हैः रामायणे । २ । ६५ । ५ ।

"तेन शब्देन विहगाः प्रतिबुद्धाश्च रुरुवुः ।
शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥")

पञ्जरः, पुं, (पञ्ज्यते रुध्यते आत्मा यस्मिन् । पजि रोधे + अरन् ।) शरीरम् । इति त्रिकाण्डशेषः ॥ (यथा, हठयोगदीपिकायाम् । ४ । १८ ।

"द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वेव निरर्थकाः ॥"
"पञ्जरे पञ्जरवच्छिरास्थिभिर्वद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गवां नीराजनाविधिः । इति सारस्वताभिधानम् ॥

पञ्जराखेटः, पुं, (पञ्जरेणेव यन्त्रेण आखेटो मृगया यस्मात् ।) मत्स्यमारणोपाययन्त्रम् । पोलो इति भाषा । तत्पर्य्यायः । प्लवः २ पलवः ३ । इति त्रिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पुं, (पञ्ज + अलच् ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूत्रनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलनालिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।

"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"

अग्रसन्धानी । इति त्रिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा । तत्श्रवणफलं यथा,—

"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सर्व्वतीर्थानि श्रूयते दिनपञ्जिका ॥"
इति दैवज्ञाः ॥

अपि च ज्योतिस्तत्त्वे वराहवचनम् ।

"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो वुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः शुभदायकः ।
करणाल्लभते लक्ष्मीं यः शृणोति दिने दिने ॥"

निःशेषपदव्याख्याची । तिथिवारादिज्ञापिका । आयव्ययलिखनार्था च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।

"अथ कायस्थः करणः पञ्जिकारकः ॥"

(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्या ॥) पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीष् ।) पञ्जिः । नालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं दैवज्ञैः ।

"दैवज्ञवक्त्रेण शृणोति पञ्जीं
शत्रुक्षयं याति शशीव कृष्णे ॥"

ग्रन्थविशेषः । यथाह ध्रुवानन्दमिश्रः ।

"प्रणम्य विघ्नेश्वरपादमादौ
सरस्वतीं तां कुलदेवताञ्च ।
शिशुप्रबोधाय कुलस्य पञ्जी
विविच्यते श्रीयुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + टः ।) कायस्थः । यथा । "कायस्थो कूटकृत्पञ्जीकरौ ।" इति त्रिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पटति । इति दुर्गादासः ॥

पट, क लिपि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, पाटयति । लिपि दीप्तौ । इति दुर्गादासः ॥

पट, त क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) ग्रन्थने । इत्यन्ये । पटयति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, (पटतीति । पट् + पचाद्यच् ।) छदिः । चालम् । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटयत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सुचेलकः २ । इत्यमरः । २ । ६ । ११६ ॥ (यथा, पञ्चदशी । ६ । ० ।

"यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्य्यामिसूत्राणि विराट् चात्मा तथर्य्यते ॥")

चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—

"पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः ।
ग्रन्थिकेशविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिद्रे तु स्थलेनैव समालिखेत् ।
योगिनी रूपिणी कार्य्या जयाद्यैः परिवारिता ॥
छेदेन च भवेद्धृत्यो व्याधिते व्याधितो भवेत् ।
कुरूपेण कुरूपस्तु स्वर्णेण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति ताड्शम् ॥"
इति देवीपुराणम् ॥

पटः, पुं, पियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन छदनेन कायति प्रकाशते इति । कै + कः ।) शिविरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्त्रवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । ताँबु इति भाषा । तत्पर्य्यायः । केणिका २ गुणालयनिका ३ । इति हेमचन्द्रः ॥

पटच्चरं, क्ली, (भूतपूर्व्वं पटत् । भूतपूर्व्वं चरट् । यद्वा पटदित्यव्यक्तं शब्दं चरतीति । पटत् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः । २ । ६ । ११५ ॥ (पच्यते आवेष्ट्यते इति । पट + वाहुलकात् अत् । पटदिव चरति यः । चर + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटमण्डपः, पुं, (पटानां वस्त्राणां मण्डपः ।) पटकुटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रगृहम् । यथा,—

"पटवापः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥

शाटी । यथा, शब्दरत्नावल्याम् ।

"पटवासः पटमयं शाटी शाटक इत्यपि ॥"